र्द्दिने एकस्मिन्नुभयोर्नोभयोरिति । एकस्मिंश्चेत् तद्दिनं स्यात् पक्षयोरन्ययोः परा । बुधे सोमे जयन्ती चेद्वारे सातिफलप्रदा । तिथ्यृक्षयोर्द्वयोरन्ते उत्तमं पारणं भवेत् । एकस्यान्ते मध्यमं स्यादुभयान्तेऽधमं स्मृतम् । यस्मिन् वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा । अन्त-र्भूता जयन्त्यां स्यादृक्षयोगप्रशस्तितः ।

नवमी पूर्वविद्धैव पक्षयोरुभयोरपि । मध्याह्ने रामनवमी पुनर्वसुसमन्विता । ग्राह्या नैवाष्टमीयुक्ता सनक्षत्रापि वैष्णवैः । कृष्णा पूर्वोत्तरा शुक्ला दशम्येव व्यवस्थिता । जयन्तीव्रतवन्नित्यं काम्यं चैकादशीव्रतम् । अरुणोदयवेधोऽत्र वेधः सूर्य्योदये तथा । उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्त्तयोः क्रमात् । कलाकाष्ठादिवेधोऽपि ग्राह्योऽत्र त्रिमुहूर्त्तवत् । वैखानसाद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः । विद्धा त्याज्या वैष्णवेन शुद्धाप्याधिक्यसम्भवे । एकादशी द्वादशी वाधिका चेत्त्यज्यतां दिनम् । पूर्वं त्याज्यमुत्तरं स्यादिति वैष्णवनिर्णयः । एकादशी द्वादशी चेदुभयं वर्द्धते यदा । तदा पूर्वदिनं त्याज्यं स्मार्त्तैर्ग्राह्यं परं दिनम् । एकादशीमात्रवृद्धौ गृहियत्योर्व्यवस्थितिः । उपोष्या गृहिभिः पूर्वा यतिभिस्तूत्तरा तिथिः । द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते । शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः । श्रवणेन युता चेत् स्याद्द्वादशी सा हि वैष्णवैः । स्मार्त्तैश्चोपोषणीया स्यात् त्यजेदेकादशीं तदा । उपवासव्रतादन्यव्रते सार्द्धमुहूर्त्तकैः । सप्तभिर्दशमीविद्धामेतामेकादशीं त्यजेत् । द्वादशी पूर्वविद्धैव निखिलेषु व्रतेष्वपि । शुक्लत्रयोदशी पूर्वा परा कृष्णत्रयोदशी । अलाभे सापि पूर्वैव पराऽनङ्गत्रयोदशी । या शुक्ला गृह्यते पूर्वा गृह्यतां सापराह्णिकी । चतुर्दश्युत्तरा शुक्ला पूर्वा कृष्णचतुर्दशी । उदये द्विमुहूर्त्तापि ग्राह्यानन्तव्रते तिथिः । शुक्लापि रात्रियुक्ता स्याच्चैत्रश्रावणमासयोः । शुक्ला सर्वापि पूर्वैव यदि स्यादापराह्णिकी । प्रदोषे वा निशीथे वा द्वयोर्वा यास्ति सा भवेत् । शिवरात्रिव्रते तत्र द्वयोः सत्ता प्रशस्यते । तदभावे निशीथैकव्याप्तापि परिगृह्यताम् । तस्याश्चासम्भवे ग्राह्या प्रदोषव्यापिनी तिथिः । तिथ्यन्ते पारणं यामत्रयादर्वाक् समापने । अन्यथा पारणं प्रातरन्यतिथ्युपवासवत् । पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः । नाड्योऽष्टादश भूतस्य स्युश्च तत्र परेऽहनि । व्रतान्तराणि सर्वाणि परेऽहन्येव सर्वदा । श्राद्धेऽपराह्णकालीनो दर्श आवर्द्दिकवन्मतः । दिनद्वयेऽप्येकदेशवृत्तौ ग्राह्यो महत्त्वतः । तुल्यत्वं चेदेकदेशक्षये पूर्वोऽन्यथोत्तराः । कृत्स्नव्याप्तौ द्वयोरह्नोरुत्तरस्तिथिवृद्धितः । साग्न्यनग्निव्यवस्था स्यान्न चेत् स्यादपराह्णयोः । पूर्वेद्युः साग्निकः कुर्य्यादुत्तरेद्युर्निरग्निकः । पर्वप्रतिपदोः सन्धिर्मध्याह्ने वा ततः पुरा । अन्वाधानं पूर्वदिने यागः सन्धिदिने भवेत् ।। ऊर्द्ध्वं मध्याह्नतः सन्धावन्वाधानं तु तद्दिने । इष्टिं परदिने कुर्य्यादन्यो वाजसनेयिनः । यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात् पुरा । न काप्यन्वाहितिः किन्तु सदा सन्धिदिने हि सा । सन्धिश्चेत् सङ्गवादूर्द्ध्वं प्राक्चेदावर्त्तनाद्रवेः । सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः । वृद्धिः प्रतिपदो यास्ति तदूर्द्ध्वं पर्वणि क्षियेत् । क्षयस्याद्धं तथा हित्वा सन्धिर्निश्चीयतां तदा । वौधायनमते दर्शश्राद्धं चेष्टिर्विशिष्यते । द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपच्चापराह्णिकी । अन्वाधानं चतुर्दश्यां दर्शस्यान्तेऽपि वर्त्तयेत् । दर्शश्राद्धं तथा कार्य्यमिति बौधायनोदितम् । इष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः" ५प्रकरणे नक्षत्रनिर्णयो विस्तरभयान्न दर्शितः ।

दर्शादिश्राद्धेऽन्यत्र चोक्तं यथा

"दर्शो यत्रापराह्णं स्पृशति स दिवसः श्राद्धकालो द्वयोश्चेद्यत्रानल्पो यदासौ यदि भवति समः क्षीयमाणे तु पूर्वः । वृद्धौ साम्ये त्वनग्नेर्युवतिदृषलयोश्च स्व एवाहिताग्नेः पूर्वो न क्वापराह्णं स्पृशति कृतपसंस्पर्शतोऽयं विधिः स्यात् । सायन्त्वन्यपरत्र चेन्मृततिथिः सैवाब्दिके मासिके ग्राह्या सा द्व्यपराह्णयोर्यदि तदा यत्राधिका सा मता । तुल्या चेदुभयापराह्णसमये पूर्वा न चेत् सङ्क्षये पूर्वैव त्रिमुहूर्त्तगास्तसमये नो चेत् परैवोचिता" ।

तिथिविशेषकृत्ये खण्डतिथिविशेषग्रहणं तत्तच्छब्दे उक्तं वक्ष्यते च । तिथितत्त्वादौ द्रष्टव्यम् ।

प्रतिपदादितिथिविशेषाणामुभयदिनव्याप्त्यादौ निर्णयः निर्णयसिन्धौ दर्शितो यथा

"शुक्लप्रतिपदपराह्णव्यापित्वे पूर्वा ग्राह्या युग्मवाक्यात् प्रतिपत्सम्मुखी कार्य्या या भवेदापराह्णिकीति" स्कान्दोक्तेः "शुक्ला स्यात् प्रतिपत्तिथिः प्रथमतश्चेत् सापराह्णे भवेदिति" दीपिकोक्तेश्च । अपराह्णश्च पञ्चधा भक्ते दिने चतुर्थो भागः । तदभावे सायाह्नव्या-